श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ पञ्चाशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ पञ्चाशः सर्गः ॥

## लक्ष्मणसुमन्त्रयोः संवादः

दृष्ट्वा तु मैथिलीं सीतामाश्रमे सम्प्रवेशिताम्।
सन्तापमगमद् घोरं लक्ष्मणो दीनचेतनः॥ **7.50.1** ॥

अब्रवीच महातेजाः सुमन्त्रं मन्त्रसारथिम्।
सीतासन्तापजं दुःखं पश्य रामस्य सारथे॥ **7.50.2** ॥

ततो दुःखतरं किं नु राघवस्य भविष्यति।
पत्नीं शुद्धसमाचारां विसृज्य जनकात्मजाम्॥ **7.50.3** ॥

व्यक्तं दैवादहं मन्ये राघवस्य विनाभवम्।
वैदेह्या सारथे नित्यं दैवं हि दुरतिक्रमम्॥ **7.50.4** ॥

यो हि देवान् सगन्धर्वानसुरान् सह राक्षसैः।
निहन्याद् राघवः क्रुद्धः स दैवं पर्युपासते॥ **7.50.5** ॥

पुरा रामः पितुर्वाक्याद् दण्डके विजने वने।
उषित्वा नव वर्षाणि पञ्च चैव महावने॥ **7.50.6** ॥

ततो दुःखतरं भूयः सीताया विप्रवासनम्।
पौराणां वचनं श्रुत्वा नृशंसं प्रतिभाति मे॥ **7.50.7** ॥

को नु धर्माश्रयः सूत कर्मण्यस्मिन् यशोहरे।
मैथिलीं समनुप्राप्तः पौरैर्हीनार्थवादिभिः॥ **7.50.8** ॥

एता वाचो बहुविधाः श्रुत्वा लक्ष्मणभाषिताः।
सुमन्त्रः श्रद्धया प्राज्ञो वाक्यमेतदुवाच ह॥ **7.50.9** ॥

न सन्तापस्त्वया कार्यः सौमित्रे मैथिलीं प्रति।
दृष्टमेतत् पुरा विप्रैः पितुस्ते लक्ष्मणाग्रतः॥ **7.50.10** ॥

भविष्यति दृढं रामो दुःखप्रायो विसौख्यभाक्।
प्राप्स्यते च महाबाहुर्विप्रयोगं प्रियैर्वृतम्॥ **7.50.11** ॥

त्वां चैव मैथिलीं चैव शत्रुघ्नभरतौ तथा।
स त्यजिष्यति धर्मात्मा कालेन महता महान्॥ **7.50.12** ॥

इदं त्वयि न वक्तव्यं सौमित्रे भरतेऽपि वा।
राज्ञा वो व्याहृतं वाक्यं दुर्वासा यदुवाच ह॥ **7.50.13** ॥

महाजनसमीपे च मम चैव नरर्षभ।
ऋषिणा व्याहृतं वाक्यं वसिष्ठस्य च सन्निधौ॥ **7.50.14** ॥

ऋषेस्तु वचनं श्रुत्वा मामाह पुरुषर्षभः।
सूत न क्वचिदेवं ते वक्तव्यं जनसन्निधौ॥ **7.50.15** ॥

तस्याहं लोकपालस्य वाक्यं तत्सुसमाहितः।
नैव जात्वनृतं कुर्यामिति मे सौम्य दर्शनम्॥ **7.50.16** ॥

सर्वथैव न वक्तव्यं मया सौम्य तवाग्रतः।
यदि ते श्रवणे श्रद्धा श्रूयतां रघुनन्दन॥ **7.50.17** ॥

यद्यप्यहं नरेन्द्रेण रहस्यं श्रावितः पुरा।
तथाप्युदाहरिष्यामि दैवं हि दुरतिक्रमम्॥ **7.50.18** ॥

येनेदमीदृशं प्राप्तं दुःखं शोकसमन्वितम्।
न त्वया भरतस्याग्रे शत्रुघ्नस्यापि सन्निधौ॥ **7.50.19** ॥

तच्छ्रुत्वा भाषितं तस्य गम्भीरार्थपदं महत्।
तथ्यं ब्रूहीति सौमित्रिः सूतं तं वाक्यमब्रवीत्॥ **7.50.20** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे पञ्चाशः सर्गः॥